दिनाङ्कः ____________

# डी.ए.वी. पब्लिकविद्यालयाः, दिल्ली-एन.सी.आर.

## संस्कृतम्

## आदर्शप्रश्नपत्रम् -2025-26

## अर्धवार्षिकी परीक्षा

## कक्षा- सप्तमी

**अवधिः - होरात्रयम्** **पूर्णाङ्काः - 80**

**निर्देशाः -**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 8 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 20 प्रश्नाः सन्ति।
- अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति-

| | | | | |
|---|---|---|---|---|
| **'क'** | **भागः** | **:** | **अपठितावबोधनम्** | **10 अङ्काः** |
| **'ख'** | **भागः** | **:** | **रचनात्मककार्यम्** | **15 अङ्काः** |
| **'ग'** | **भागः** | **:** | **अनुप्रयुक्तव्याकरणम्** | **25 अङ्काः** |
| **'घ'** | **भागः** | **:** | **पठितावबोधनम्** | **30 अङ्काः** |

- प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
- प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।
- प्रश्नपत्रपठनाय 15 निमेषाः प्रदेयाः।

## खण्डः - 'क'

## अपठित-अवबोधनम् 10 अङ्काः

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

भारतदेशः पर्वतानां देशः अस्ति। सर्वेषु पर्वतेषु हिमालयः महान् पर्वतः अस्ति। अत एव हिमालयः पर्वतानां राजा कथ्यते। हिमालयस्य शिखराणि सदैव हिमेन आच्छादितानि भवन्ति। एषः भारतस्य उत्तरदिशायाम् अस्ति। हिमालयः प्रहरी इव सदैव शत्रुभ्यः भारतं रक्षति। प्राचीनकाले अनेके ऋषि-मुनयः हिमालये एव वसन्ति स्म। ते तत्र आश्रमं निर्माय साधनां कुर्वन्ति स्म। हिमालयात् अनेकाः नद्यः निस्सरन्ति। अस्मिन् पर्वते अनेकानि तीर्थस्थानानि सन्ति। प्रतिवर्षं अनेके जनाः हिमालयस्य शोभां द्रष्टुं गच्छन्ति।

**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) कस्मात् अनेकाः नद्यः निस्सरन्ति ?

(ii) कः पर्वतानां देशः अस्ति ?

(iii) कः शत्रुभ्यः भारतं रक्षति ?

**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **2×2=4**

(i) ऋषि-मुनयः हिमालये किं कुर्वन्ति स्म ?

(ii) हिमालयः केषां राजा अस्ति ?

(iii) प्रतिवर्षं जनाः कुत्र गच्छन्ति ?

**(इ) निर्देशानुसारम् उत्तरत -** **1×4=4**

(i) 'नृपः' इति शब्दस्य पर्यायपदं गद्यांशे किम् अस्ति ?

(क) नद्यः (ख) राजा (ग) भारतम् (घ) पर्वतः

(ii) 'मित्रेभ्यः' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम् ?

(क) शत्रुभ्यः (ख) मुनयः (ग) पर्वतानाम् (घ) जनाः

(iii) 'हिमालयात् अनेकाः नद्यः निस्सरन्ति।' अत्र विशेषणं किम् अस्ति ?

(क) नद्यः (ख) निस्सरन्ति (ग) हिमालयात् (घ) अनेकाः

(iv) 'हिमालयः पर्वतानां राजा अस्ति।' अत्र क्रियापदं किम् अस्ति ?

(क) हिमालयः (ख) अस्ति (ग) पर्वतानाम् (घ) राजा

## खण्डः - 'ख'

## रचनात्मक-कार्यम् 15 अङ्काः

**2. दिनद्वयस्य अवकाशार्थं प्रधानाचार्यं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्त-उचितपदैः पूरयित्वा पूर्णं पत्रं पुनः उत्तरपुस्तिकायां लिखत -** **1×5=5**

सेवायाम्

(i) _____________ प्रधानाचार्याः,

डी.ए.वी. विद्यालयः।

महोदयाः!

सविनयं निवेदयामि यत् गतरात्रेः अहं (ii) _____________ ग्रस्तः अस्मि। अस्मात् कारणात् अहं (iii) __________ आगन्तुम् असमर्थः अस्मि। अतः दिनद्वयस्य अवकाशं दत्वा माम् अनुगृह्णन्तु, भवताम् अति कृपा भविष्यति। पठने या (iv) _____________ भविष्यति तदहम् आगामि-सप्ताहे पूर्णं करिष्यामि। अहं भवतः कृपया उचितान् अङ्कान् प्राप्य (v) _____________ भविष्यामि। धन्यवादः।

भवतां शिष्यः,

जयेशः

कक्षा - सप्तमी


**मञ्जूषा**

| उत्तीर्णः, विद्यालयम्, ज्वरेण, मान्याः, हानिः। |
|---|

**3. चित्रं दृष्ट्वा मञ्जूषायाः सहायतया रिक्तस्थानानि पूरयित्वा वाक्यानि लिखत -** **1×5=5**

**मञ्जूषा**

| श्यामपट्टः, कक्षायाः, पठन्ति, अध्यापिका, छात्राः। |
|---|



(i) इदं चित्रम् ______________ अस्ति।

(ii) कक्षायाम् एका ______________ पाठयति।

(iii) कक्षायाम् एकः ______________ अस्ति।

(iv) अत्र तिस्रः ______________ सन्ति।

(v) छात्राः ध्यानेन ______________ लिखन्ति च।

**4. रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत -** 1×5=5

**रमेशः** - हे मानव! त्वम् अधुना किं करोषि ?

**मानवः** - (i) ____________________।

**रमेशः** - त्वं कस्य विषयस्य परियोजनां रचयसि ?

**मानवः** - (ii) ____________________।

**रमेशः** - परियोजनायाः विषयः कः अस्ति ?

**मानवः** - (iii) ____________________।

**रमेशः** - रुचिकरः विषयः अयम्। किं त्वं मित्रेण सह इदं कार्यं करोषि ?

**मानवः** - (iv) __________________।

**रमेशः** - अस्तु। अतीव शोभनम्।

**मानवः** - (v) __________________।

**मञ्जूषा**

- अहं संस्कृतविषयस्य परियोजनां रचयामि।
- आम्, अहं मित्रेण सह मिलित्वा इदं कार्यं करोमि।
- अहं परियोजना-कार्यं करोमि।
- धन्यवादः। कार्यं कृत्वा आवां पुनः मेलिष्यावः।
- 'वृक्षाणां भेदाः' इति परियोजनायाः विषयः अस्ति।

**अथवा**

**अधोलिखित-कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत -**

काशीनगरे एकः आचार्यः अस्ति। आचार्यस्य समीपम् एकः (i) __________ आगच्छति। शिष्यः वदति - आचार्य! अहं विद्याभ्यासार्थम् आगतवान्। आचार्यः परीक्षार्थं (ii) __________ पृच्छति - वत्स! ईश्वरः कुत्र अस्ति? शिष्यः वदति - (iii) __________ तु सर्वत्र अस्ति। सन्तुष्टः गुरुः वदति - (iv) __________ शोभनम्। त्वं बुद्धिमान् असि, अतः विद्याभ्यासार्थं (v) __________ तव स्वागतम्।

**मञ्जूषा**

| |
|---|
| गुरुकुले, शिष्यः, अतीव, शिष्यम्, ईश्वरः। |

**खण्डः - 'ग'**

**अनुप्रयुक्त-व्याकरणम् 25 अङ्काः**

**5. अधोलिखितपदानां वर्णसंयोजनं वर्णविच्छेदं च प्रदत्तविकल्पेभ्यः चित्वा लिखत -** 1×2=2

(i) ज्+ई+व्+अ+न्+अ+स्+य्+अ

(क) जीवनसय (ख) जीवनस्य

(ग) जिवनस्य (घ) जीवनम्

(ii) उपकारकाः

(क) उ+प्+अ+क्+आ+र्+अ+क्+आः (ख) उ+प्+अ+क्+अ+र्+अ+क्+आः

(ग) उ+प्+अ+क्+आ+र्+अ+क्+अः (घ) ऊ+प्+अ+क्+आ+र्+अ+क्+आः

**6. अधोलिखित-वाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पूर्णवाक्यं लिखत -** 1×3=3

**(केवलं प्रश्नत्रयम्)**

(i) सः बङ्गप्रदेशे एकस्मिन् **विद्यालये** पठति स्म।

(ii) **महेशः** उच्चैः हसति।

(iii) बालकः **प्रति + ईक्षां** करोति।

(iv) प्रातः काले **सूर्य+उदयः** भवति।

**7. अधोलिखित-वाक्येषु समुचितं शब्दरूपं चित्वा वाक्यानि पूरयत -** 1×4=4

(i) प्रशाखासु ____________ सन्ति।

(क) फलेन (ख) फले (ग) फलम् (घ) फलानि

(ii) ___________ वानराः अत्र-तत्र कूर्दन्ति।

(क) वृक्षाः (ख) वृक्षे (ग) वृक्षान् (घ) वृक्षः

(iii) इदं गृहं ____________ बालिकायाः अस्ति।

(क) तया (ख) ताम् (ग) तस्याः (घ) ताः

(iv) कक्षायां ____________ बालकः पुस्तकं पठति?

(क) कः (ख) कौ (ग) कान् (घ) के

8. **अङ्कानां स्थाने संस्कृतसङ्ख्यावाचकं पदं प्रयुज्य पूर्णवाक्यं लिखत -** 1×3=3

(i) मम परिवारे (6) ______________ सदस्या: सन्ति।

(क) पञ्च (ख) षट् (ग) सप्त (घ) षष्ठः

(ii) मार्गे (41) ______________ वृक्षाः आसन्।

(क) त्रिचत्वारिंशत् (ख) चतुर्दश (ग) द्विचत्वारिंशत् (घ) एकचत्वारिंशत्

(iii) नद्याम् (1) ______________ नौका तरति।

(क) एक: (ख) एका (ग) एकम् (घ) एकस्य

9. **रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत - (केवलं प्रश्नत्रयम्)** 1×3=3

(i) **विद्यालयम्** उभयतः वृक्षाः सन्ति।

(ii) अलं **विवादेन**।

(iii) वृक्षा: **अस्मभ्यं** प्राणवायुं यच्छन्ति।

(iv) लता **गृहं** प्रति अगच्छत्।

10. **अधोलिखितेषु प्रदत्तविकल्पेभ्य: उचितं धातुरूपं चित्वा रिक्तस्थानानि पूरयत -** 1×4=4

(i) यूयं कुत्र ______________ ?

(क) गच्छसि (ख) गच्छति (ग) गच्छथ (घ) गच्छथः

(ii) अहं चलचित्रम् ______________ ।

(क) अपश्यम् (ख) अपश्यत् (ग) अपश्य: (घ) अपश्याम

(iii) मोहन: एकं पत्रं ______________ ।

(क) लेखिष्यसि (ख) लेखिष्यथः (ग) लेखिष्यामि (घ) लेखिष्यति

(iv) सर्वे बाला: बहि: गत्वा ______________ ।

(क) क्रीडन्तु (ख) क्रीडतु (ग) क्रीडत (घ) क्रीड

11. **रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत - (केवलं प्रश्नद्वयम्)** 1×2=2

(i) सः ईश्वरं **प्र + नम् + ल्यप्** पठति।

(ii) सः जलम् **आदाय** आगच्छति।

(iii) सिंह: पश्चात्तापं **कृत्वा** बुभुक्षित: एव अतिष्ठत्।

12. **मञ्जूषायाः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयित्वा पूर्णवाक्यं लिखत -** ½×4=2
**(केवलं प्रश्नचतुष्टयम्)**

(i) यदि अहम् उत्तरं न दास्यामि ______________ तु श्रृगाल: गमिष्यति।

(ii) ______________ सोमवासरः अस्ति।

(iii) माता ______________ गच्छति?

(iv) स: ______________ पाठान् अपठत्।

(v) सिहः ______________ भ्रमन् एकां गुहाम् अपश्यत्।

**मञ्जूषा**

| अद्य, पुनः इतस्ततः, कुत्र, तदा । |
|---|

13. अधोलिखितवाक्येषु रेखाङ्कितपदेषु उपसर्गं पृथक् कृत्वा संयोज्य वा पूर्णवाक्यं लिखत - 1x2=2
(केवलं प्रश्नद्वयम्)

(i) सहपाठिनः तस्य <u>उपहासं</u> कुर्वन्ति स्म।

(ii) सैनिकः चौरं <u>प्र + हरति</u>।

(iii) पुत्रः जलम् <u>आ + नयति</u>।

## खण्ड - 'घ'

## पठित-अवबोधनम् 30 अङ्काः

14. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

वृक्षाः अस्माकं जीवनस्य आधाराः सन्ति। एते भूमेः उद्भवन्ति। एतेषां मूलानि पृथिव्यां दूरं दूरं ततानि भवन्ति। मूलानाम् उपरिष्टात् वृक्षस्य प्रकाण्डः भवति। प्रकाण्डात् शाखाः उद्भवन्ति। शाखाभ्यः प्रशाखाः सम्भवन्ति। एतासु प्रशाखासु एव पत्राणि पुष्पाणि फलानि च भवन्ति। वृक्षाः अपि अस्माकम् इव भुक्त्वा पीत्वा च जीवन्ति। मूलानि वृक्षाणां पादाः भवन्ति। एते पादैः पिबन्ति अतएव पादपाः कथ्यन्ते।

**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** ½x2=1

(i) शाखाभ्यः काः सम्भवन्ति ?

(ii) वृक्षाः कस्याः उद्भवन्ति ?

(iii) मूलानि केषां पादाः भवन्ति ?

**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** 1x2=2

(i) अस्माकं जीवनस्य आधाराः के सन्ति ?

(ii) वृक्षाः कथं जीवन्ति ?

(iii) वृक्षस्य प्रकाण्डः कुत्र भवति ?

**(इ) निर्देशानुसारम् उत्तरत -** 1x2=2

(i) 'एतासु प्रशाखासु एव पत्राणि पुष्पाणि फलानि च भवन्ति।' अत्र विशेषणं किम् अस्ति ?

(क) प्रशाखासु (ख) भवन्ति (ग) पत्राणि (घ) एतासु

(ii) 'वृक्षाः अस्माकं जीवनस्य आधाराः सन्ति।' अस्मिन् वाक्ये क्रियापदं किम् अस्ति ?

(क) सन्ति (ख) जीवनस्य (ग) अस्माकम् (घ) आधाराः

15. अधोलिखितौ श्लोकौ पठित्वा प्रश्नानाम् उत्तराणि लिखत- 5

**को भारः समर्थानां, किं दूरं व्यवसायिनाम्।**
**को विदेशः सविद्यानां, कः परः प्रियवादिनाम् ॥**
**महाजनस्य संसर्गः कस्य नोन्नतिकारकः।**
**पद्मपत्रस्थितं वारि धत्ते मुक्ताफलश्रियम् ॥**

**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** ½x2=1

(i) महाजनस्य संसर्गः कीदृशः भवति ?

(ii) केषां कृते कः अपि परः न भवति ?

(iii) केषां कृते किमपि स्थानं विदेशः न भवति ?

**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) किं मुक्ताफलश्रियं धत्ते ?

(ii) केषां कृते किमपि कार्यं भारः न भवति ?

(iii) केषां कृते किमपि स्थानं दूरं न भवति ?

**(इ) निर्देशानुसारम् उत्तरत् -** **1×2=2**

(i) 'जलम्' इति पदस्य पर्यायपदं श्लोके किम् अस्ति ?

(क) मुक्ताफलम् (ख) वारि (ग) पत्रम् (घ) स्थितम्

(ii) 'देशः' इति पदस्य विलोमपदं श्लोके किं प्रयुक्तम् ?

(क) वारि (ख) संसर्गः (ग) सविद्यानाम् (घ) विदेशः

**16. अधोलिखितं संवादं पठित्वा प्रश्नानाम् उत्तराणि लिखत -** **5**

**अध्यापिका** - शोभनम्, मानव! अधुना त्वं वद - भोजनेन शक्तिः कथं प्राप्यते ?

**मानवः** - शरीरस्य कोषिकासु या काचित् अपि दुर्बलता भवति, भोजनेन एव परिपूर्यते।

**अध्यापिका** - शोभनम्। कथयन्तु पौष्टिकं भोजनं किं भवति ?

**मनस्विनी** - अहं कथयामि। पौष्टिकम् अर्थात् सन्तुलितं भोजनम्।

**सुधीरः** - यस्मिन् भोजने सर्वाणि तत्त्वानि स्युः। यथा- 'प्रोटीन', वसा, खनिजपदार्थाः, जलम्, रुक्षांशाः, 'विटामिन' च इति।

**अध्यापिका** - शोभनम्। एतैः तत्त्वैः किम् भवति ?

**प्रगतिः** - 'प्रोटीन' इति तत्त्वेन नवकोषिकाणां रचना भवति! 'कार्बोहाइड्रेट' वसा च इति अस्मभ्यं नवशक्तिं यच्छतः।

**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **½×2=1**

(i) भोजनेन का प्राप्यते ?

(ii) सन्तुलितं भोजनं किं भवति ?

(iii) कस्य दुर्बलता भोजनेन परिपूर्यते ?

**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) सन्तुलितभोजने कानि तत्त्वानि स्युः ?

(ii) 'प्रोटीन' इति तत्त्वेन किं भवति ?

(iii) के अस्मभ्यं नवशक्तिं यच्छतः ?

**(इ) निर्देशानुसारम् उत्तरत -** **1×2=2**

(i) 'कथयन्तु पौष्टिकं भोजनं किं भवति ?' अत्र विशेषणपदं किम् अस्ति ?

(क) भोजनम् (ख) भवति (ग) पौष्टिकम् (घ) कथयन्तु

(ii) 'बलम्' इति पदस्य पर्यायः अत्र कः ?

(क) परिपूर्यते (ख) शक्तिः (ग) भोजनेन (घ) वासा

**17. रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं पूर्णवाक्येन कुरुत - (केवलं प्रश्नचतुष्टयम्)** **1×4=4**

(i) **घटस्य** अधः एकः गर्तः आसीत्।

(ii) **पशूनां** सङ्ख्या न्यूनतरा अभवत्।

(iii) **बालकः** विचारमग्नः अभवत्।

(iv) सर्वे पशवः **सिंहात्** भीताः आसन्।

(v) छात्रः **मातरम्** अपृच्छत्।

**18. श्लोकं पठित्वा उचितैः पदैः अन्वयपूर्तिं कुरुत -** **1×4=4**

**विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय।**

**खलस्य साधोर्विपरीतमेतत् ज्ञानाय दानाय च रक्षणाय ॥**

**अन्वयः -** खलस्य विद्या (i) ________ , धनं (ii) _________, शक्तिः परेषां (iii) ________ ।
साधोः एतत् (iv) __________ ज्ञानाय, दानाय रक्षणाय च।

**मञ्जूषा -**

| |
|---|
| परिपीडनाय, विवादाय, विपरीतम्, मदाय |

**अथवा**

**मञ्जूषातः समुचितपदानि चित्वा श्लोकस्य भावार्थं पूरयित्वा पुनः लिखत -** **1×4=4**

**अयं निजः परो वेति गणना लघुचेतसाम्।**

**उदारचरितानां तु वसुधैव कुटुम्बकम् ॥**

**भावार्थः -** समाजे ये जनाः अयं (i) ________ अस्ति अयम् अपरस्य अस्ति इति चिन्तयन्ति ते (ii) ________ मानवाः भवन्ति, परन्तु उत्तमाः जनाः तु (iii) ________ संसारम् एव (iv) ________ इव मन्यन्ते।

**मञ्जूषा -**

| |
|---|
| सम्पूर्णम्, मम, कुटुम्बकम्, निम्नश्रेण्याः |

**19. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितां कथां पूरयत -** **½×8=4**

एकः सिंहः वनस्य राजा आसीत्। (i) ________ प्रतिदिनं पशून् मारयति स्म। सिंहात् (ii) ________ पशवः गुहासु वसन्ति स्म। एकदा सिंहः (iii) __________ आसीत्। सः एकां गुहाम् अपश्यत् अचिन्तयत् च - 'अत्र अवश्यमेव पशुः भविष्यति। अहं तं खादित्वा तृप्तः भविष्यामि। एषा (iv) ________ अपि च मम भविष्यति।' (v) __ स्वामी एकः श्रृगालः आसीत्। सः मार्गे (vi) ___ चरण-चिह्नानि दृष्ट्वा सज्जः अभवत्। सः गुहायाः समीपं गत्वा अवदत्- अयि गुहे! सर्वत्र कुशलम् अस्ति न वा? सिंहः अवदत्- अत्र सर्वं (vii) __________ अस्ति। श्रृगालः सत्यं ज्ञात्वा ततः अधावत्। सिंहः (viii) _________ कृत्वा बुभुक्षितः एव अतिष्ठत्।

**मञ्जूषा -**

| |
|---|
| बुभुक्षितः, गुहायाः, पश्चात्तापम्, सिंहः, सिंहस्य, भीताः, गुहा, कुशलम्। |

**20.अधोलिखितपदानाम् उचित-अर्थैः सह मेलनं कृत्वा लिखत -** **1×3=3**

(i) शोभनम् - ______________________

(ii) निश्चितम् - ______________________

(iii) मित्राणि - ______________________

**मञ्जूषा -**

| |
|---|
| सहपाठिनः, सुन्दरम्, अवश्यम् |

...............

**डी. ए. वी. पब्लिक विद्यालया:, दिल्ली - एन सी आर**

**संस्कृतम्**

**आदर्श-प्रश्नपत्रम् (2025-26**

**अर्धवार्षिकी परीक्षा**

**कक्षा - सप्तमी**

**समय: - होरात्रयम्** **अङ्कविभाजनम् उत्तरसङ्केताश्च** **पूर्णाङ्का: – 80**

**निर्देश: - अस्मिन् उत्तरसङ्केते लिखितेभ्यः उत्तरेभ्यः अन्यत् अपि शुद्धम् उत्तरम् अस्ति तु तत्रापि अङ्का: दातव्याः।**

---

**खण्ड: - 'क' (अपठित-अवबोधनम् ) 10 अङ्का:**

**1. अपठित: गद्यांश: -**

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) **1×2=2**

**(i)** हिमालयात् **(ii)** भारतदेश: **(iii)** हिमालय:

(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) **2×2=4**

(i) ऋषि-मुनयः हिमालये आश्रमं निर्माय साधनां कुर्वन्ति स्म।

(ii) हिमालयः पर्वतानां राजा अस्ति।

(iii) प्रतिवर्षं जनाः हिमालयस्य शोभां द्रष्टुं गच्छन्ति।

(इ) निर्देशानुसारम् उत्तरत - **1×4=4**

(i) (ख) राजा (ii) (क) शत्रुभ्यः (iii) (घ) अनेकाः (iv) (ख) अस्ति

**खण्ड: - 'ख' (रचनात्मक-कार्यम्) 15 अङ्का:**

2. **पत्रलेखनम्** – **1×5=5**

(i) मान्याः (ii) ज्वरेण (iii) विद्यालयम् (iv) हानि: (v) उत्तीर्ण:

**3. चित्रवर्णनम् –** **1×5=5**

(i) कक्षायाः (ii) अध्यापिका (iii) श्यामपट्टः (iv) छात्राः (v) पठन्ति

**4. संवादलेखनम् -** **1x5=5**

(i) अहं परियोजना-कार्यं करोमि।

(ii) अहं संस्कृतस्य परियोजनां रचयामि।

(iii) 'वृक्षाणां भेदा:' इति मम परियोजनाया: विषय: अस्ति।

(iv) अहं मित्रेण सह मिलित्वा इदं कार्यं करोमि।

(v) कार्यं कृत्वा आवां पुन: मेलिष्याव:।

**कथापूर्ति: -** **1x5=5**

(i) शिष्यः (ii) शिष्यम् (iii) ईश्वरः (iv) अतीव (v) गुरुकुले

**खण्डः - 'ग' (अनुप्रयुक्त-व्याकरणम्) 25 अङ्काः**

**5. वर्णसंयोजनं वर्णविच्छेदः च -** 1x2=2

(i) (ख) जीवनस्य (ii) (क) उ+प्+अ+क्+आ+र्+अ+क्+आः

**6. सन्धिः सन्धिच्छेदः (केवलं प्रश्नत्रयम्) -** 1×3=3

(i) विद्या+आलये (ii) महा+ईशः (iii) प्रतीक्षाम् (iv) सूर्योदयः

**7. शब्दरूपाणि -** 1×4=4

(i) (घ) फलानि (ii) (ख) वृक्षे (iii) (ग) तस्याः (iv) (क) कः

**8. संस्कृतसङ्ख्या: -** 1×3=3

(i) (ख) षट् (ii) (घ) एकचत्वारिंशत् (iii) (ख) एका

**9. कारक-उपपदविभक्तयः - (केवलं प्रश्नत्रयम्)** 1×3=3

(i) द्वितीया विभक्तिः / उभयतः योगे

(ii) तृतीया विभक्तिः / अलम् योगे

(iii) चतुर्थी विभक्तिः / दा धातोः योगे

(iv) द्वितीया विभक्तिः / प्रति योगे

**10. धातुरूपाणि -** 1×4=4

(i) (ग) गच्छथ (ii) (क) अपश्यम् (iii) (घ) लेखिष्यति (iv) (क) क्रीडन्तु

**11. प्रत्ययाः - ( केवलं प्रश्नद्वयम् )** 1x2=2

(i) प्रणम्य (ii) आ+दा+ल्यप् (iii) कृ+क्त्वा

**12. अव्ययपदानि - (केवलं प्रश्नचतुष्टयम्)** ½x4=2

(i) तदा (ii) अद्य (iii) कुत्र (iv) पुनः (v) इतस्ततः

**13. उपसर्गाः - (केवलं प्रश्नद्वयम्)** 1x2=2

(i) उप+हासम् (ii) प्रहरति (iii) आनयति

**खण्डः - घ (पठित-अवबोधनम्) 30 अङ्काः**

**14. पठित-गद्याशः -** 5

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½x2=1

(i) प्रशाखाः (ii) भूमेः (iii) वृक्षाणाम्

(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1x2=2

(i) अस्माकं जीवनस्य आधाराः वृक्षाः सन्ति।

(ii) वृक्षाः अस्माकम् इव भुक्त्वा पीत्वा च जीवन्ति।

(iii) वृक्षस्य प्रकाण्डः मूलानां उपरिष्टात् भवति ।

(इ) निर्देशानुसारम् उत्तरत - 1x2=2

(i) (घ) एतासु (ii) (क) सन्ति

**15. पठित-पद्यद्वयम् / श्लोकौ -** **5**

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) **½x2=1**

(i) उन्नतिकारक: (ii) प्रियवादिनाम् (iii) सविद्यानाम्

(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) **1x2=2**

(i) पद्मपत्रस्थितं वारि मुक्ताफलश्रियं धत्ते।

(ii) समर्थानां कृते किमपि कार्यं भारः न भवति।

(iii) व्यवसायिनां कृते किमपि स्थानं दूरं न भवति।

(इ) निर्देशानुसारम् - **1x2=2**

(i) (ख) वारि (ii) (घ) विदेशः

**16. पठित-संवाद: -** **5**

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) **½x2=1**

(i) शक्ति: (ii) पौष्टिकम् (iii) शरीरस्य

(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) **1x2=2**

(i) यस्मिन् भोजने सर्वाणि तत्त्वानि स्युः यथा- 'प्रोटीन', वसा, खनिजपदार्थाः, जलम्, रुक्षांशाः, विटामिन च।

(ii) 'प्रोटीन' इति तत्त्वेन नवकोषिकाणां रचना भवति।

(iii) कार्बोहाइड्रेट वसा च इति अस्मभ्यं नवशक्तिं यच्छतः।

(इ) निर्देशानुसारम् उत्तरत - **1x2=2**

(i) (ग) पौष्टिकम् (ii) (ख) शक्ति:

**17. प्रश्ननिर्माणम् – (केवलं प्रश्नचतुष्टयम् )** **1x4=4**

(i) कस्य अधः एकः गर्तः आसीत् ?

(ii) केषां सङ्ख्या न्यूनतरा अभवत् ?

(iii) कः विचारमग्नः अभवत् ?

(iv) सर्वे पशवः कस्मात् भीताः आसन् ?

(v) छात्रः काम् अपृच्छत् ?

**18. अन्वयपूर्ति: -** **1x4=4**

(i) विवादाय (ii) मदाय (iii) परिपीडनाय (iv) विपरीतम्

**अथवा**

**भावार्थपूर्ति: -** **1x4=4**

(i) मम (ii) निम्नश्रेण्याः (iii) सम्पूर्णम् (iv) कुटुम्बकम्

19. **कथापूर्तिः -** ½x8=4

(i) सिंहः (ii) भीताः (iii) बुभुक्षितः (iv) गुहा (v) गुहायाः (vi) सिंहस्य (vii) कुशलम् (viii) पश्चात्तापम्

20. **उचित अर्थैः सह मेलनम् -** 1x3=3

(i) शोभनम् - सुन्दरम्

(ii) निश्चितम् - अवश्यम्

(iii) मित्राणि - सहपाठिनः